॥ श्री: ॥

॥ पाणिग्रहणम् ॥

सत्यवती— सखि, अद्य सुप्रभातम् । चिरात् दृष्टासि ।

कान्तिमती–– वर्धतां नः सौहार्दम् । सावित्रीकथाश्रवणादारभ्य भूयोऽपि त्वद्दर्शनाय बलवदुत्कण्ठितं मे हृदयम् ।

सत्यवती— तादृशीनां पतिव्रतोत्तमानां स्मरणमेव सत्त्वोन्मेषं जनयति तमोऽभिभूतानामपि ।

कान्तिमती–– सत्यम् । तदाप्रभृति अस्माकं समयाचाराणां स्वरूपं ज्ञातुं अभिलाषः समजनि ।

सत्यवती–– कस्मिन् विषये ?

कान्तिमती–– तदानीं प्रसङ्गतो विवाहमन्त्राणां सारस्त्वया कथितः किल ।

सत्यवती–– अथ किम् ।

कान्तिमती–– तत्र वधूवराभ्यां अन्योन्यमेवं वर्तितव्यमिति

अनुशिष्टं किल । कथमिव तत् अर्भकप्रायैः वरैः वधूभिश्च ज्ञातुं शक्यते ?

सत्यवती—– अत एवोच्यते शैशवं अतिक्रान्तानामेव पाणिग्रहणविधौ अधिकारः इति आधुनिकैः ।

कान्तिमती— सूत्रकाराणां आशयः किल प्रथमं ज्ञातव्यः ।

सत्यवती—– विशिष्य आशयो न प्रकाशितः कुत्रापि तैः त्रिकालवेदिभिः अस्मिन् विषये । पाणिग्रहणविधानं तदन्तर्गतानां मन्त्राणां च अर्थः त्वया सूक्ष्मदृष्ट्या अवगन्तव्यः ।

कान्तिमती— तदत्रभवत्येव सर्वमुपदिशतु मे ।

सत्यवती— सखि, कथयामि यावन्मे विदितम् । प्रथमं वेदमधीत्य स्नातेन वरेण आप्ताः सुहृदः चत्वारो मन्त्रज्ञाः कन्यां वरयितुं प्रेषणीयाः ।

कान्तिमती— नाहमवगच्छामि औचित्यमत्र । यदन्यदीयचक्षुषा वरणं वल्लभायाः इति नातःपरं कष्टतरमस्ति वधूवरयोः । किमिति वरः स्वयमेव गत्वा न वृणोति आत्मनः प्रेयसीम् ?

सत्यवती— कदाचित् केवलेन रूपेण मोहितो वरः असदृशगोत्रजां असतीसमुत्पन्नां अज्ञानेन उद्वहेत् इति कृत्वा आप्ताः सुहृद एव अत्र साधीयः प्रमाणम् इति महर्षि-

णामाशयः—— इति अनुमिनोमि ।

कान्तिमती—— 'यस्यां मनश्चक्षुषोः निबन्धः तस्यां ऋद्धिः' इति सूत्रकाराः 'न ह्याकृतिः व्यभिचरति शीलम्' इति कार्तान्तिकाश्च समामनन्ति ।

सत्यवती—— किमेतावता? आप्तानामार्याणां अन्तःकरणप्रवृत्तिरेव अस्मिन् वरणकर्मणि प्रमाणमिति मया अवगम्यते ।

कान्तिमती—— सत्यम् । 'दाराः पितृकृताः' इति मैथिल्यां राघवस्य बहुमानातिशयः इति वाल्मीकिर्वर्णयति । अस्मिन्काले तु प्रायेण सर्वेऽपि स्वार्थपराः सुहृदो नाम भूत्वा वञ्चयन्ति वधूवरौ—— इति नायं सूत्रकाराणामपराधः ।

सत्यवती—— 'इयं सीता मम सुता सहधर्मचरी तव' इति सूक्तिं अनुसंदधतां अस्माकं दारग्रहणं धर्माचरणाय न तु भोगाय इति विशदीभवति किल ।

कान्तिमती—— पुरा किल धर्मं अन्ववर्तत कामः । अधुना तु कामं अनुवर्तते धर्मः इति महायनं भेदः ।

सत्यवती—— ततः पित्रादिः वधूकुलं प्राप्ताय वराय कन्यां उदकपूर्वं ददाति । मधुपर्कप्रदानेन यथार्हं संभावयति च जामातरम् ।

कान्तिमती-- सखि, किमर्थं उदकपूर्वकं दीयन्ते सर्वाण्यपि दानानि ?

सत्यवती-- अप्सु सर्वा देवताः प्रतिष्ठिताः इति देवतासाक्षिकं प्रदीयते दानम् इति तर्कयामि । नाराः (आपः) अयनम् (स्थानम्) यस्य इति व्युत्पत्तिं आमनन्ति किल निगमविदो नारायणशब्दस्य ।

कान्तिमती— द्रवद्रव्यमिदं स्थलात् स्थलान्तरं प्रयाति इत्यतो हेतोः दीयमानायाः कन्यकायाः स्वत्वं अन्यं समाश्रयति इति मे वितर्कः ।

सत्यवती— युक्तिरियं समीचीना । अपि जानासि कोऽयं मधुपर्कविधिः इति ।

कान्तिमती— मधुना दधि घृतं धानाः सक्तूंश्च संसृज्य पात्रे निधाय अतिथये अभ्यर्हिताय प्रदानम् इति आतिथ्यविदो वदन्ति ।

सत्यवती— अत्र विशेषतो वक्तव्या विषयाः सन्ति । परं तान् अन्यस्मिन् समये विमृशावः । प्रकृते तु पाणिग्रहणात्पूर्वं वरेण पितॄनुद्दिश्य नान्दीश्राद्धं करणीयं इति जानासि किल ।

कान्तिमती-- न मया ज्ञातम् । ब्रूहि, किमर्थं इदं श्राद्धं

नाम अशुभं कर्म शुभे विवाहे कर्तव्यतया निश्चितं महर्षिभिः ।

सत्यवती-- साधु पृच्छसि । मयापि एनमेव विषयमधिकृत्य अनुयुक्तो गुरुः 'भद्रे, पितॄणां ऋणनिर्मोक्षसाधनं इदमुद्वाहकर्मेति कृत्वा तेषामनुग्रहद्वारा सत्सन्तानसमृद्धिं कामयमानोऽयं वरः नान्दीश्राद्धेन प्रथमं पितॄणां सौमनस्यं संपादयति' इति मामवादीत् ।

कान्तिमती-- आं युज्यते । 'सन्तानार्थाय विधये,' 'प्रजायै गृहमेधिनाम्,' 'नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः । न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः' इत्यादि वदता कविसार्वभौमेनापि उपदिष्टं इदं उद्वाहविधिरहस्यम् ।

सत्यवती— ततश्च वरः स्वयं वधूं दृष्ट्वा 'अभ्रातृघ्नीम्' इत्यादिमन्त्रं जपति ।

कान्तिमती –'अभ्रातृघ्नीम्' इत्यनेन वरः अस्या अधिगमेन सोदरस्नेहादीनां ह्रासो मा भूत् इति प्रार्थयत इव । पित्रार्जितस्य द्रविणस्य विभागार्थं परस्परं सोदराणां कलहे तत्तद्भार्या एव निदानम् इति सर्वविदितं किल ।

सत्यवती— मेधाविनीमत्रभवतीमुपलक्षये । "देशे देशे कल-

त्राणि देशे देशे च बान्धवाः । तं तु देशं न पश्यामि यत्र भ्राता सहोदरः' इति सौभ्रात्रस्य उत्कर्षं उपादिक्षत् राघवः । एवं सति किमर्थं इमे स्त्रीजिताः सोदरस्नेहमपि दूरीकुर्वन्ति ।

कान्तिमती— किमन्यत् । योषितां अनधिगतविद्यासंस्काराणां ईर्ष्याकषायितान्तरात्मनां स्वार्थपरत्वमेवात्र निदानम् ।

सत्यवती— एवंवादिनी भवती आत्मन उदारां प्रकृतिं आविष्करोषि ।

कान्तिमती— यथार्थकथने का प्रशंसा? उपरितनमपि विधानं वर्णय ।

सत्यवती— ततश्च वरो वधूमुपसृत्य 'अघोरचक्षुरपतिघ्नी' इत्यादिकां ऋचं अनुवाचयन्नेव तस्या दृष्टौ स्वदृष्टिं पातयति ।

कान्तिमती— मन्त्रेणानेन दम्पत्योः परस्परं तारामैत्रकं संपाद्यते इति ऋषीणां आशयेन भवितव्यम् ।

सत्यवती— ततः परं अनामिकाकनिष्ठिकाभ्यां अङ्गुष्ठं संगमय्य दर्भं संगृह्य 'त्वयि पतिघ्नीं अलक्ष्मीं नाशयामि' इत्यर्थकं मन्त्रं उद्गिरन् तेन तस्याः भ्रुवोरन्तरं संमृज्य प्रतीच्यां दिशि उत्सृजति ।

कान्तिमती— सम्यग्विचार्यमाणे समन्त्रकमिदं विधानं— स्तिमितावलोकनेन चेष्टाभिश्च अन्यस्य मनः स्वायत्तीकुर्वत आधुनिकान् तान्त्रिकान् (those who mesmerize) स्मारयति ।

सत्यवती— ततश्च यदि कन्या 'पितृकुलादन्यत्र गन्तव्यम्' इति चिन्तया रुद्यात्, तर्हि 'जीवां रुदन्तीम्' इति मन्त्रेण वरः तस्याः सौमनस्यं संपादयति ।

कान्तिमती— अचिन्त्यो हि मन्त्राणां प्रभावः ।

सत्यवती— अथ युग्मान् मन्त्रवतो ब्राह्मणान् अपामानयनाय प्रहिणोति ।

कान्तिमती— किमिति स्त्रियो जलाहरणाय न प्रेष्यन्ते ?

सत्यवती— मन्त्रोच्चारणपूर्वकं खलु उदकमादातव्यम् ।

कान्तिमती— ततस्ततः ।

सत्यवती— अथ मण्डलाकारं दर्भसंचयं बध्वा शिरसि निधाय तदुपरि दक्षिणं युगच्छिद्रं निवेश्य, छिद्रे सुवर्णं निक्षिप्य, पावनं मन्त्रपञ्चकं उच्चार्य, तां स्नपयति । ततो नूतनेन वस्त्रेण तां परिधाप्य दर्भरज्जुं कट्यां बध्नाति ।

कान्तिमती— तन्वङ्ग्याः शिरसि किमर्थं युगस्य दक्षिणो भागो निक्षिप्यते ?

सत्यवती— अद्याहं गृहमेधी भविष्यामि । धर्माचरणे गार्हस्थ्यधुराया अर्धो भागः त्वयापि वोढव्यः इति ज्ञापनार्थं इति तर्कयामि ।

कान्तिमती— अतिरमणीयं मन्त्रयसे । सुवर्णशकलनिक्षेपे किं तात्पर्यम् ?

सत्यवती— 'हिरण्यवर्णाः शुचयः पावकाः' इति मन्त्रलिङ्गेन उदकानां सुवर्णवर्णसंपादनं हिरण्यस्पर्शेन स्नानस्य पारिशुद्ध्यमपि द्योत्यते ।

कान्तिमती— अहो भवत्या मतिवैशद्यम् ।

सत्यवती— अथैतां दक्षिणे हस्ते गृहीत्वा अग्निमभ्येत्य उदगग्रं कटमास्तीर्य दक्षिणे पार्श्वे एनामुपवेश्य स्वयमपि तस्मिन्नुपविशति ।

कान्तिमती— किमर्थं दक्षिणे पार्श्वे एव वध्वा अवस्थानम् ?

सत्यवती— पुरुषाणां दक्षिणः पार्श्वः वनितानां च वामः श्लाघ्यतया परिकीर्त्यते । अतस्तयोरेवमवस्थानं परस्परं आदरातिशयद्योतनार्थम्— इति मन्ये ।

कान्तिमती— साधु, साधु ।

सत्यवती— अथ अग्निं उपसमाधाय 'सोमः प्रथमः' इत्या-

दिना मन्त्रद्वयेन तां अभिमन्त्रयति ।

कान्तिमती— किमर्थमिदं अभिमन्त्रणम् ?

सत्यवती— मन्त्रेऽस्मिन् सोमगन्धर्वाग्निभिः त्रिभिर्देवैः पर्यायेण गृहीता कन्या । 'तुरीयस्ते मनुष्यजाः' इति तस्याः मनुष्यः चतुर्थः पतिः इति ज्ञायते । अतस्तेषां गन्धर्वाणां सौमनस्यसंपादनार्थमिदं अभिमन्त्रणम् ।

कान्तिमती— अतः सर्वासामपि वनितानां चत्वारो वल्लभाः भवन्ति इति अद्य ज्ञायते ।

सत्यवती— 'देवपतित्वम्' इत्यस्य ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च पोषणं तत्तदधिष्ठानदेवैः क्रियते । मनुष्येण तु सर्वस्यापि शरीरस्य पोषणम्— इत्यान्तरो भावः ।

कान्तिमती— ततस्ततः ।

सत्यवती— अथाधः प्रसृतेन दक्षिणेन हस्तेन उपरिस्थितं वध्वाः दक्षिणं हस्तं परिगृह्णाति वरः । यदि 'स्त्रीरेवास्यां जनयेयम्' इत्यभिलाषः, तर्हि तस्या अङ्गुलीरेव गृह्णीयात् । यदि च 'पुंस एवास्यामुत्पादयेयम्' इतीच्छा, तर्हि उत्तानं तस्या अङ्गुष्ठं अङ्गुष्ठेन गृह्णीयात् । पाणिग्रहणकाले वरेण 'गुणवतीः प्रजास्त्वयि जनयेयम्' इत्यर्थका मन्त्रा जप्याः ।

कान्तिमती— युज्यते । ‘अङ्गुष्ठः पुरुषस्थानीयः । अङ्गुल्यश्च स्त्रीस्थानीयाः’ इतीयं मानसी वृत्तिः अत्यन्तं हृद्या सहृदयानाम् । अङ्गुलीष्वेकस्याः द्वयोर्वा अभावे कार्यहानिर्नोपलभ्यते । अङ्गुष्ठनिकृन्तने तु अङ्गुलीनां शरीरस्य च महद्दौर्बल्यमुपलभ्यते किल ।

कान्तिमती— साधु पश्यसि । अनन्तरं वधूमेनां दक्षिणेन पदा प्राच्यामुदीच्यां वा दिशि ‘एकमिषे विष्णुस्त्वान्वेतु’ इत्यादिमन्त्रसप्तकं उद्गिरन् सप्त पदानि प्रक्रमयति ।

कान्तिमती— किमर्थमयं सप्तकृत्वः पदविन्यासः ?

सत्यवती— सख्यं साप्तपदीनमाहुः किल सहृदयाः । वरश्च सप्तमे पदे ‘सखा सप्तपदा भव’ इत्यादिमन्त्रं जपति ।

कान्तिमती— सखि, सप्तपदाभिक्रमणे कीदृश आन्तरोऽभिप्रायः इति न मे विशदमवभासते ।

सत्यवती— (किञ्चिद्विचिन्त्य) भूर्भुवःसुवरित्यादिसप्तलोकेष्वपि आवाभ्यां सहैवाविनाभूताभ्यां गन्तव्यमिति समयबन्ध इव प्रतिभाति ।

कान्तिमती— दुरूहो मन्त्रकृतामभिप्रायः ।

सत्यवती— अथैतौ दम्पती जातवेदसं प्रदक्षिणीकृत्य यथानिर्दिष्टं कटे उपविशतः । ततश्च वरः वध्वा क्षणमप्य-

वियुक्तः सन् 'सोमाय जनिविदे स्वाहा' इत्यादिभिः षोडशभिः मन्त्रैः जुहोति ।

कान्तिमती—— सप्तपद्यनन्तरमेवाजस्रं होमादिक्रियासु अन्वारब्धा वधूः आत्मनः सहधर्मचरीत्वं अन्वर्थयतीव ।

सत्यवती— अनन्तरमेनां अग्नेरुत्तरतः दक्षिणेन पदा निष्क्रमय्य 'आतिष्ठ इमं अश्मानम्, अश्मेव त्वं स्थिरा भव' इति मन्त्रमुच्चरन् अश्मानम् आस्थापयति ।

कान्तिमती— विधानेनानेन प्रेयसीं आत्मनो गृहदेवतापदे अग्नेः समक्षं अभिषिञ्चतीव वरः ।

सत्यवती— अथास्याः अञ्जलौ द्विर्लाजान् निक्षिप्य, आज्येनाभिघार्य, 'जुहोतीयं नारी' इति मन्त्रेण मे सहधर्मचारिण्या अयं होमः क्रियते इति अग्निं प्रतिबोध्य लाजहोमं कारयति ।

कान्तिमती—— (स्मरणमभिनीय) वध्वाः सोदरः किल लाजान् आवपति ।

सत्यवती— तदपि केषांचिन्महर्षीणां मतम् । एवं पुनः परिक्रमणं अश्मन्यवस्थापनम् लाजहोमः— इति विधानमिदं त्रिः क्रियते ।

कान्तिमती-- किमनेन सूच्यते?

सत्यवती-- अश्मन्यवस्थापनेन 'अश्मेव त्वं मयि स्थिरा भव; त्वदभिसरणोद्यतान् अन्यान् शत्रून् परिभूय दूरतस्त्यज' इति वरेण उपदिश्यते। लाजहोमेन 'पत्युः दीर्घमायुर्भवतु' इति वध्वा प्रार्थ्यते। अग्नेः प्रदक्षिणीकरणेन 'तेजोबलमेधादीनामभिवृद्धिः सत्सन्तानसंपदादयश्च' अग्नेः सकाशात् उभाभ्यामप्यभिलष्यन्ते ।

कान्तिमती— साधु, साधु । दिग्विजयमुद्दिश्य प्रस्थितवतो रघोः आयुष्यकामनया अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः इति वर्णयति किल कालिदासः ।

सत्यवती— ततो जयादिहोमं कृत्वा वध्वाः मध्यदेशे निबद्धां रज्जुं विमुच्य तां हस्तिनमश्वं वा प्रवाहयेत्; शिबिकां रथं वा समारोहयेत् ।

कान्तिमती— कोऽयं जयादिः?

सत्यवती— अयमुपसंहारहोमः ।

कान्तिमती-- अनेन पाणिग्रहणविधिः प्रायः परिसमाप्तः इति मन्ये ।

सत्यवती— ततो विवाहाग्निं गृहीत्वा वधूसमेतः स्वगेहं गत्वा

प्रवेशहोमं कृत्वा उद्वाहविधिं परिसमापयति वरः ।

कान्तिमती— स एवायमग्निर्यावज्जीवं गृहे धार्यते इति वदन्ति किल वर्षीयांसः ।

सत्यवती–– सत्यम् । यद्ययमग्निः मध्येमार्गं निर्वाणो भवति, तर्हि अस्य भस्मना संस्पृश्य अरणिर्मन्थितव्यः । अथवा अधीतवेदस्य श्रोत्रियस्य गृहादग्निराहार्यः । भार्यायाः पत्युर्वा उपवासः प्रायश्चित्तत्वेन विहितः ।

कान्तिमती–– नित्यं धार्योऽयमग्निः इति निर्बन्धे किं कारणम् ?

सत्यवती— विवाहसमये साक्षित्वेन अवस्थिते एव अग्नौ अनुसवनं होमः दम्पत्योरभ्युदयहेतुः इति तर्कयामि ।

कान्तिमती— पुरा किल स्मृतिपथातीते काले अत्यन्तं शीतबाधाक्रान्ते गिरिप्रान्तदेशे अवात्सुः अस्मत्पूर्वपुरुषाः । तदानीं शैत्यनिवारणायाजस्रं अगारे अग्निर्धार्य आसीत् । अत एवायं नियमः तदानीन्तनैः महर्षिभिरनुशिष्टः । परं तु क्रमेण वितस्ताशिक्नीशुतुद्र्यादिनदीः तीर्त्वा आर्यावर्तमप्यतीत्य ऊष्मलानिमान् दक्षिणभूमिभागान् अधिगतवतामार्याणां धार्याग्निः सांप्रतमनावश्यकः इति केचनाधु-

निकाः चरित्रविमर्शका वदन्ति ।

सत्यवती-- कान्तिमति, 'परलोकोऽस्ति वा उत न?' इति विचारयतां पार्थिवभोगैकप्रवणमानसानां चार्वाकप्रायाणां आधुनिकानां युक्तिवादः कचित्क्वचित्समीचीनोऽपि न मे हृदयं प्रविशति । संप्रति काममनुवर्तते धर्मः इति त्वयैवोक्तं खलु ।

कान्तिमती-- परतोऽपि वर्णय ।

सत्यवती-- अथ रथं सज्जीकृत्य मन्त्रपूर्वकं अश्वावनड्वाहौ वा बद्ध्वा वरः रथमारोहयति वधूम् । 'पतिकुले भिन्नभिन्नाभिरुचिमतां श्वश्रूश्वशुरननान्द्रादिजनानां मध्ये कुलान्तरोत्पन्नया मुग्धया मया कथमिव सुखेनावस्थातुं शक्यते?' इति कदाचिदियं वधूस्तदीया जनाश्च विमनीभवेयुः इति कृत्वा वरः 'पत्युः मूर्धानमारोह; प्रजया च विराड् भव; श्वश्रूश्वशुरननान्द्रादीनां मदीयानां जनानां पशुपुत्रादिसंपदां मद्गृहस्य च त्वमेव ईश्वरी भव' इत्यादिभिः प्रणयमधुरैर्वचोभिः सौमनस्यमुत्पादयति इत्यहो! लोकज्ञता मन्त्रकृतामृषीणाम् ।

कान्तिमती— हन्त! काचग्रहणोन्मुखाः पुरोहिताः विवेकि-

भिः अत्यन्तमभिनन्दनीयान् इमान्विषयान् प्रायेण न जानन्ति इति दूयते मे हृदयम् ।

सत्यवती—– कालेऽस्मिन् अध्ययनपराः अर्थज्ञानपराङ्मुखाः केवलमक्षरराशिग्रहणेनैव आत्मनः कृतार्थतां मन्यन्ते ।

कान्तिमती—– साहित्यविदः शास्त्रज्ञाश्च वेदाध्ययनपराङ्मुखाः निगमपुरुषस्य स्वरूपमप्यजानन्तः दूरतःस्खलितमात्मनो ब्राह्मण्यं नावगच्छन्ति— इत्यहो! कालस्य वैपरीत्यम् ।

सत्यवती— पुरा किल साङ्गानां वेदानां सामान्यशास्त्राणां चाध्ययनमावश्यकमासीत् सर्वेषामपि पण्डितानाम् । अद्य तु सर्वस्यापि प्राचीनाध्ययनक्रमस्य उत्सर्गो दृश्यते । किमस्माकं अनया कथया? प्रकृतमनुसरामः ।

कान्तिमती— सखि, सम्यगुक्तम् । 'यया कयाच विधया बह्वन्नं प्राप्नुयात्' इति श्रुतिरेकैवाद्य सर्वेषामप्यनुभवसिद्धा वरीवर्ति । रथमारूढयोः वधूवरयोर्यात्रां अनुवर्णय ।

सत्यवती—– प्रस्थानात्पूर्वं रथस्य वर्त्मनोरुभयोरपि नीललोहिते सूत्रे व्यवस्तृणाति वरः ।

कान्तिमती—– किमर्थमिदम्?

सत्यवती— परैः प्रहितायाः कृत्याया उपद्रवनिवारणार्थम् ।

कान्तिमती— सखि, कृत्या नाम कीदृशी ?

सत्यवती— शत्रूणामाभिचारप्रयोगेण प्रेरिता विपदामधिदेवता दंपत्योरभ्युदयं रुणद्धि इति प्राचां मतम् ।

कान्तिमती— तदिदं नवीनवैज्ञानिकानां हृदये न प्रविशति ।

सत्यवती— किं तेन ? अनुभवसिद्धोऽयं विषयः प्रायः सर्वेषामप्यस्मद्देशीयानाम् ।

कान्तिमती— सत्यम् । पठ्यते किल निकुम्भिलावृत्तान्तो रामायणे । सखि, शेषमपि कथय ।

सत्यवती— व्यवस्तीर्णयोः सूत्रयोरुपरि रथेनाभिगच्छति वरः सह वध्वा । मध्येमार्गे च तीर्थस्थाणुचतुष्पथव्यतिक्रमे तत्तदधिष्ठानदेवतायाः प्रसादाधिगमाय मन्त्रान् जपति ।

कान्तिमती— युक्तरूपमेवेदमास्तिकानाम् ।

सत्यवती— यदि च पथि नदी नावा तरितव्या तर्हि वरो नावमभिमन्त्र्य सहाग्निना वध्वा च नावमारोहति । न च तरन्ती वधूः नाव्यान् पश्येत् ।

कान्तिमती— किंनिमित्तोऽयं निषेधः ।

सत्यवती— साहसिकानां नाविकानां सुसमृद्धे नदीप्रवाहे

व्यापारं दृष्ट्वा मुग्धेयं बिभियात् इति सूत्रकाराणामाशयेन भवितव्यम् ।

कान्तिमती-- अहमप्येवमेव मन्ये ।

सत्यवती-- श्मशानभूमेरुपरि रथस्य गमने अग्निभाण्डे रथे वा भग्ने अग्नेः मुखान्तमारभ्य प्रायश्चित्ताहुतीः हुत्वा जयादिपर्यन्तं कृत्वा पुनर्यात्रामारभते । प्लक्षन्यग्रोधादीनां महावनस्पतीनां महारण्यानां च व्यतिक्रमे मन्त्रान् जपति ।

कान्तिमंती— ततस्ततः ।

सत्यवती— ततो गृहान् संप्राप्य वध्वै 'इदं मे सदनम्, इमे च मदीया जनाः' इत्यादि वदन् दर्शयति ।

कान्तिमती— अन्यथा कथमियं पतिकुलमिदमिति जानीयात् !

सत्यवती— अनन्तरं कृतज्ञतानुसंधानद्योतकैः मन्त्रैः वाहौ विमुञ्चति वरः । ततश्च मध्येऽगारं प्राचीनग्रीवमुत्तरलोम लोहितं चानडुहं चर्म आस्तीर्य सह वध्वा गृहं प्रविशति । यथा च प्रविशन्ती वधूर्देहलीं नाधितिष्ठेत्, तथा जागरूकेण वरेण भवितव्यम् ।

कान्तिमती-- किमर्थमयं निर्बन्धः ? न हि देहल्यां राक्षसः चोरो वा वसति ।

सत्यवती— देशेऽस्मिन् देहल्यामेव आसन्नमृत्यूनां पुरुषाणां वनितानां च निवेशो भवति । तेन हि तत्रावस्थाने कदाचिन्मङ्गलेतरस्य स्मरणं भवेदित्याकलय्य तन्निवारणकामैर्महर्षिभिरयं नियमः कृतः इति तर्कयामि ।

कान्तिमती— साधुरयं ते तर्कः ।

सत्यवती— ततश्च उत्तरपूर्वे प्रदेशे अगारस्य अग्नेर्यथाविधि होमं कृत्वा चर्मणि उपविशति वरः सह वध्वा । अथ वध्वा अङ्के जीवत्पुत्रायाः पुत्रमुपवेश्य तस्मै मन्त्रपूर्वकं फलानि दत्त्वा नक्षत्रोदयपर्यन्तं तूष्णीं तिष्ठति । उदितेषु च नक्षत्रेषु प्राचीमुदीचीं वा दिशं वधूं नीत्वा ध्रुवमरुन्धतीं च दर्शयति ।

कान्तिमती— अनेन विधानेन 'आवामग्नेः प्रसादेन आत्मजपरिष्वङ्गामृतास्वादसुखं लब्ध्वा कृतकृत्यौ भूयास्व' इति वरः आशास्त इति मन्ये । उक्तं हि कुन्तीं प्रत्यनपत्यतादूयमानमानसेन पाण्डुना

'अहं किमम्बा किमभीष्टतापदे
तवेति मातुर्धुरि तातपृच्छया ।
प्रलोभतुल्यं प्रवदन्तमर्भकं
मुदा हसञ्जिघ्रति मूर्ध्नि पुण्यभाक् ॥' इति ।

परं तु ध्रुवारुन्धतीदर्शनं किमर्थमिति न ज्ञायते ।

सत्यवती-- नक्षत्रदर्शनकाले जप्यमानानां मन्त्राणां अर्थे परामृश्यमाने— 'पुरा काश्यपादयः सप्तर्षयः आसन्; तेषां कृत्तिका नाम भार्याः सप्त; तासां अरुन्धती नाम सप्तमी पतिव्रताप्रधानभूतानिश्चला च; इतरा व्यभिचारशङ्कया त्यक्ताः इत्यैतिहासिकाः स्मरन्ति । अहं सप्तर्षीणां अष्टमस्थानीयो भूयासम्; इयमपि कृत्तिकासु अष्टमस्थानीया भूयात्' इति वरस्य आशंसा स्पष्टीभवति ॥

कान्तिमती— सखि, नक्षत्राणि हि गोलाकाराणि पुण्यकर्मभिः अनन्तरजन्मसु अधिगम्यमानानि लोकान्तराणि इति कथ्यन्ते । तत्कथमिव तेषां स्त्रीपुरुषभावना पातिव्रत्यादिगुणाश्रयो वा घटते ।

सत्यवती— तत्तदधिष्ठानदेवतास्वरूपमेव अत्रोदाहृतमिति मन्ये ।

कान्तिमती— बृहस्पतिग्रहासन्नं किञ्चित् ऋक्षं कदाचित् शशाङ्कमण्डले निपतितमासीत् । तयोश्च मेलनेन बुध इति ग्रहान्तरं नूतनमुत्पन्नमितीमं खगोलवृत्तान्तमेव ताराशशाङ्कोपाख्यानत्वेन वर्णयन्ति ऐतिहासिकाः । तदेतदुपेक्षितव्यमिति नवीनाः ज्योतिर्विदः ।

सत्यवती— षोडशस्त्रीसहस्राणाम् पतिः श्रीमान् वासुदेवः तत्तद्गृहे सममेव विहरन् दृष्टो नारदेन । एवमेव गोपीवृत्तान्तश्च । एषा कथा सम्यङ्निरूप्यमाणा सर्वसङ्गपरित्यागिनां परमात्मानमेव अनवरतं अनुध्यायतां जीवानां शुद्धसत्त्वमये लोके नित्यकैङ्कर्यानन्दप्राप्त्यादि श्रुतिशतनिरूपितं रहस्यमेव प्रकारान्तरेण अवगमयति विवेकिनः इति जानासि किल । तद्वदिहापि स्यात् ।

कान्तिमती— सखि, किमर्थमिदं अध्यात्मस्वरूपनिरूपणे प्रकारान्तराश्रयणम्? अतत्त्वविदो हि यथाश्रुतग्राहिणः 'गोपकन्याभुजङ्गोऽयम्, जारवृत्तिरेषः, गोपालोऽसौ, अतः न सर्वथा पूजनीयः' इत्यादि वदन्तः 'सर्वं कृष्णार्पणमस्तु' इत्यनवरतं अनुध्यायतां अस्माकं मतस्योपरि दूषणं उद्घोषयन्ति ।

सत्यवती— 'सर्वं कृष्णार्पणमस्तु' इत्यस्मिन् वाक्ये एव हृदयंगमं समाधानमुपलभ्यते । महानयं विषयः प्रसङ्गान्तरे विमर्शनीयः । संप्रति प्रकृतमनुसरावः ।

कान्तिमती— प्रवेशहोमे कृते पाणिग्रहणविधिः परिसमाप्तः इति किल चिन्तितं मया ।

सत्यवती— न हि न हि । स्थालीपाककवैश्वदेवादीनां गृहमे-

धिभिः सह वध्वा अनुष्ठेयानां कर्मणाम् उपदेशमन्तरा उद्वाहविधिः असंपूर्णः किल ।

कान्तिमती— सत्यम् । अन्यथा कथमियं सहधर्मचारिणीव्यपदेशमर्हति ।

सत्यवती— ततश्च गृहमेधिकर्मानुतिष्ठतोः दम्पत्योः पाणिग्रहणदिवसात्प्रभृति त्रिरात्रम् अधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनम् इत्यादिनियमो विहितः । तयोरुभयोः शय्यामन्तरेण गन्धलिप्तो वाससा सूत्रेण वा परिवीतः नैयग्रोध औदुम्बर आश्वत्थः प्लाक्षो वा दण्डः स्थापयितव्यः । एते एव वृक्षाः गन्धर्वाप्सरसां गृहाः इत्याम्नायविदो वदन्ति ।

कान्तिमती— किमर्थमिदं दण्डे गन्धर्वस्य आवाहनम्?

सत्यवती— विश्वावसुनामायं गन्धर्वः । तेनेयं परिगृहीता । तस्य च अनुज्ञां नतिभिः स्तुतिभिश्च संपाद्य वरो धर्मप्रजाधिगमाय वधूसंगमं प्रारिप्सते ।

कान्तिमती-- विवाहादिवसादारभ्य त्रिरात्रम् उभयोः ब्रह्मचर्यनियमः; चतुर्थ्यां तु रजन्यामपररात्रे दण्डोत्थापनेन गन्धर्वप्रसादनद्वारा ऋतुदोषशमनानन्तरं दम्पत्योः शुभे मुहूर्ते समावेशो भवति इति किल सूत्रकाराः ।

सत्यवती— अथ किम् ।

कान्तिमती— अनेन ऋतुमतीनामेव विवाहः शास्त्रीयः इति निःसंशयं ज्ञायते ।

सत्यवती— सखि, किञ्चिदिव अवधेहि । पुरा किल– श्राद्धादिषु मांसादीनां परिवेषः; सर्ववर्णेषु ब्राह्मणानां दारक्रिया; द्विजन्मनां महानसेषु शूद्रैः पाकक्रिया; स्त्रीणां च रजोदर्शनात्परम् उद्वाहः; वेदमधीत्य स्नातानामेव गार्हस्थ्येऽधिकारः-- इत्यादयः समयाचाराः शास्त्रीया इति प्राचीनानां स्मृतिकर्तॄणामाशयः इति ज्ञायते । तदा हि धर्ममन्ववर्तत कामः । पुरुषार्थेषु धर्मो मोक्षश्च प्रधानभूतौ आस्ताम् । तस्मिंश्च काले प्राचुर्येण सत्त्वगुणस्यैव उन्मेषः समजनि । परलोकभीतिः अभ्यधिका आसीत् । पार्थिवभोगप्रवणाश्च विरला आसन् । ब्राह्मणा हि तदानीं समलोष्टाश्मकाञ्चनाः यदृच्छालाभसंतुष्टा ब्रह्मनिष्ठाश्च बभूवुः । धनिकाः प्रभवश्च तेषां नैस्पृह्यवैराग्यादिगुणसंपत्तिमभिवीक्ष्य तत्कटाक्षलाभं साम्राज्यलाभादप्यधिकं मेनिरे ।

इदानीं तु काममनुवर्तते धर्मः । अर्थकामाविति द्वावेव पुरुषार्थौ प्रधानतया विलसतः । कालेऽस्मिन् प्रायो रजसः तमसश्चैवोन्मेष उपलभ्यते । परलोकः शशविषाणतुल्य इति

निश्चितः । पार्थिवभोगाधिगमेनैव जन्मनः साफल्यम् अनुपश्यन्ति विपश्चितोऽपि । ब्राह्मणा हि द्रविणाशापिशाचिकाग्रस्ताः ईषणात्रयवशीकृताः परित्यक्तस्वीयवृत्तयः कामक्रोधलोभादीनां दासभूताः पर्यटन्ति । धनिकानां प्रभूणां च प्रसादाधिगमकाङ्क्षिणः इमे विगतान्यकर्तव्याः तान् स्तुवन्ति उद्भावयन्ति च तन्माहात्म्यम् ।

एवं स्थिते मांसाशनाद्याचाराः रजस्तमःप्रचुरे कालेऽस्मिन् अनर्थावहा भवेयुः इति ज्ञात्वैव रजोदर्शनात्पूर्वमेव पाणिग्रहणविधानमवश्यकर्तव्यम् इति अभिज्ञाः त्रिकालवेदिनः केचन महर्षिकल्पा निरचैषुः । अत्र कं दोषं अनुपश्यति भवती ?

कान्तिमती— सत्यमाह महानुभावा मे सखी । कालः करोति कार्याणि । ब्रह्मचर्यनियमः, गुरुकुलवासः, वेदाध्ययनम्, उदयोपस्थानम्, त्रिंशद्वयोनन्तरं पुंसां दारकर्म, अग्न्युपासनम्, वैश्वदेवाचरणम्, स्थालीपाकः— इत्यादिकथैव अद्य प्रायेणास्तमिता। क्व वयं रजस्तमोभिभूताः ? क्व च श्रुतिस्मृतिविहिता धर्माः ? तादृशधर्माणां सांप्रतं अतिदेशोद्यमः सर्वथा न विवेकिभिः आदरणीयः ।

सत्यवती— ततश्च अग्नेरुपसमाधानादि कृत्वा दम्पत्योः पर-

स्परानुरागाभिवर्धनकाम्यया काश्चन आहुतीर्हुत्वा जयादिकरणेन होमं परिसमाप्य अपरेणाग्निं प्राचीं वधूमुपवेश्य हुतशेषादाज्यं किञ्चित्तस्याः शिरस्यानीय मन्त्रोच्चारणपूर्वकं मिथः समीक्ष्य तेनैवाज्यशेषेण उभयोः हृदयदेशौ संमृज्य दम्पत्योः शरीरसंसर्गद्योतकान्मन्त्रान् समावेशने जपति वरः ।

कान्तिमती—मिथः समीक्षणम्, तत उभयोर्हृदयदेशस्पर्शः, अनन्तरं च समावेशः, इत्यनेन 'चक्षुःप्रीतिर्मनःसङ्गः' इत्यादिकमन्यत्रोदितं प्रकारमनुस्मारितास्मि ।

सत्यवती— ततः समावेशनकाले जप्यमानतया विहितो मन्त्रः स्त्रीपुंसयोः व्यवायकर्मप्रकारं विस्तरतोऽनुशिक्षयति ।

कान्तिमती— (सहासम्) अनधिगतार्थबोधकत्वं हि शास्त्रस्य लक्षणम् । आहारनिद्राभयव्यवायादयः तिरश्चामपि समाना एव । अतो मन्त्रे व्यवायानुवर्णनं किमर्थमिति न ज्ञायते ।

सत्यवती— मन्त्रोऽयं सुसूक्ष्मं अनुविमृश्यमानः समावेशोऽयं परार्थो यज्ञः न तु स्वार्थः; दम्पत्योः संसर्गो हि अरणिमथनतुल्यः; उभयोः परस्परं सौमनस्येनैव गुणवतः पुत्रस्योत्पत्तिः; पुत्रपौत्रद्वारा द्वयोरप्यमृतत्वमस्मिन् लोके; ओषध्युपचयवत् प्रजननमपि लोकस्याभ्युदयहेतुः; पितृ-

णाम् ऋणापनयनायेदमवश्यमनुष्ठेयम्' इत्यादिकमनधिगतमर्थं सम्यगुपदिशति इति ज्ञायते । तथा च 'प्रजननं वै प्रतिष्ठा साधु प्रजायास्तन्तुं तन्वानः पितॄणामनृणो भवति' इति तैत्तरीयाः समामनन्ति ।

कान्तिमती— साधु साधु । कविसार्वभौमोऽपि— 'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः', 'अत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः' इत्यादिना निषेककर्मेदं श्रुतिप्रोक्ता पञ्चमाहुतिरिति बोधयन् 'अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः' इति च तमेवार्थं प्रकारान्तरेण विशदयन् 'पुरा किल धर्ममन्ववर्तत कामः' इतीममाशयं द्रढयति किल ।

सत्यवती— कः सन्देहः ? सर्वशास्त्रमर्मवेदिनः खलु महाकवयः ।

कान्तिमती— समावेशाचरणेनावसीयते किलोद्वाहकर्म ।

सत्यवती— अथ किम् ।

कान्तिमती— सखि, सम्यगवगतो विवाहविधिप्रकारः । परं तु अत्र पाणिग्रहणानुवर्णनकाले मङ्गलसूत्रकथा विस्मृतेति मन्ये ।

सत्यवती— न हि । न हि । गृह्यसूत्रे मङ्गलसूत्रकथैव नास्ति ।

वध्वाः कण्ठे मङ्गलसूत्रबन्धनद्योतको मन्त्रः न कुत्राप्युपलभ्यते ।

कान्तिमती–– पुरोहितो मन्त्रोच्चारणपूर्वकमेव कण्ठे मङ्गलसूत्रं बध्नाति ।

सत्यवती— तेनोच्चार्यमाणा वर्णावलिः न मन्त्ररूपा । 'मङ्गल्यतन्तुनाऽनेन मम जीवनहेतुना । कण्ठे बध्नामि सुभगे त्वं जीव शरदः शतम् ।' इत्ययं कश्चन श्लोकः शिष्टैरनुमतः । मङ्गलतन्तुबन्धनं तूत्तरदेशे बहुषु जनपदेषु नाचर्यते । इदमेवाभिप्रेत्य 'अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च । तान् विवाहे प्रतीयात्; यत्तु समानं तद्वक्ष्यामः' इत्याश्वलायनो महर्षिरनुशास्ति ।

कान्तिमती— (सगौरवम्) सखि, ब्रह्मवादिनीपदमर्हत्यत्रभवती । असाधारणी ज्ञानसंपत्तिः । अन्यादृशं मन्त्रार्थविज्ञानम् । निरुपमः प्राचीनार्यधर्मविचारप्रकारः । अत्यद्भुता लोकज्ञता । अभिनन्दनीया कथोपक्षेपचातुरी । आस्वादनीया मधुरमधुरा भवत्या वाग्धोरणी । भवत्या दर्शनमप्यतिपावनमाकलयामि; किमुत भाषणम् । एवमेव गृह्योक्तानां विध्यन्तराणामपि तत्त्वार्थं भवत्याः सकाशादवगन्तुमुत्सहे । तत्प्रसीदतु भवती ।

सत्यवती— भवत्याः सत्त्वोन्मेषः एवं व्याहारयति । न तु मदीयो गुणः । महानद्य कालातिपातः समजनि । अन्यत्सर्वं प्रसङ्गान्तरे भवतु ॥

[इति निष्क्रान्ते ।